UNIVERSITY OF TORONTO
3 1761 00076315 1

Udayanacarya
Laksanavali

B
132
V2U3
1897

Digitized by the Internet Archive
in 2010 with funding from
University of Toronto

http://www.archive.org/details/lakavalu00uday

# लक्षणावली

## श्रीमदुदयनाचार्यविरचिता

—०×*×०—

काशीस्थराजकीयसंस्कृतपाठशालीयपुस्त-
कालयाध्यक्षेण पण्डितविन्ध्येश्वरी-
प्रसादशर्मणा संस्कृता ।

—०**०—

यह पुस्तक व्रजभूषणदास और कम्पनी के
पुस्तकालय में मिलेगी ।

**बनारस ।**

—*—

Published
by
BRAJ. B. DAS & CO.
BENARES.
Raj-Rajeswari Press.
1897.

Registered according to Act. XXV of 1867.

All rights reserved.

LIBRARY
JUN 15 1976
UNIVERSITY OF TORONTO
B
132
V243
1897

अथ

उदयनाचार्यविरचिता

# लक्षणावली[१]।

—०*×*०—

श्रीनृसिंहो विजयते।

प्रणम्य पार्वतीनाथं(२) नित्यविज्ञानमीश्वरम् ।
द्रव्यादिसर्वमेयानां करिष्ये लक्षणावलीम् ॥

अभिधेयः पदार्थः । स द्विविधः । भावाभाववभेदात् । तत्र नञर्थविषयत्वरहितप्रत्ययविषयो भावः । स च षोढा द्रव्यादिभेदेन । तत्रानित्यद्रव्यगुणकर्मसामान्यविशेषाः समवेताः । नित्यद्रव्यसमवायाभावाः समवेतत्वरहिताः । द्रव्यगुणकर्माणि समवेतवन्ति । सामान्यविशेषसमवा-

---

(१) यद्यपि वैशेषिकदर्शनरहस्यरूपतया किरणावल्या अन्ते ऽस्य ग्रन्थस्य सन्निवेशः समुचितस्तथापि वैशेषिकदर्शनानुरागिभिर्भृशं नोदितेन मया तेषां सौलभ्यार्थमत्रैव सन्निवेशितः । अस्य शेषशार्ङ्गधराचार्यकृता टीकाप्युपलभ्यते तदेकपुस्तकोपलम्भात्तन्मुद्रणमुपेक्ष्याधुना मूलमेव मुद्र्यते ॥

(२) पार्वतीकान्तं—पा० ३ पुस्तके ।

याभावाः समवेतरहिताः । तत्र गुणात्यन्ताभावानधिकरणं द्रव्यम् । मूर्तत्वरहितसमवेतसमवेतत्वरहितमूर्तत्वरहितामूर्तत्वरहितसमवेतजातिमद्वा (१)। गन्धासमवेतगगनारविन्दसमवेतजातिमद्वा (२)। समवेतसमवेतसमवेतं वा (३)। तच्च नवधा भिद्यते पृथिव्यादिभेदेन । तमो द्रव्यं न भवति आलोकनिरपेक्षचक्षुर्ग्राह्यत्वात् । आलोकाभाववत्तमःशब्दवाच्यत्वेन विप्रतिपत्तिविषयतया पक्षत्वम्, आलोकाभावशब्दवाच्यतया सम्प्रतिपत्तिविषयतया साध्ययोगित्वेन सपक्षत्वमिति न पक्षसपक्षयोरैक्यदोषः । तमःशब्दो द्रव्यवाचको न भवति आलोकशब्दान्यत्वे (४) सति आलोकनिरपेक्षचक्षुर्ग्राह्यवाचित्वात् । आलोकाभावशब्दवत् ॥

---

(१) मूर्तत्वरहितं यत् समवेतं गुणादिकं तत्समवेतत्वरहिता मूर्तत्वरहितसमवेताऽमूर्तत्वरहितसमवेता या जातिस्तद्वत् ॥

(२) गन्धासमवेता गगनसमवेताऽरविन्दसमवेता च या जातिस्तद्वदित्यर्थः । सत्तामादाय गुणादावतिव्याप्तिरतो गन्धासमवेतेति ॥

(३) समवेतं समवेतं यत्र तत् समवेतसमवेतं गुणादिकं तत् समवेतं यत्र तत् समवेतसमवेतसमवेतमित्यर्थः ॥

(४) आलोकशब्दस्यालोकनिरपेक्षचक्षुर्ग्राह्यालोकवाचित्वात् तत्र च द्रव्यवाचकत्वाद्व्यभिचार इति सत्यन्तम् ।

तत्र गन्धात्यन्ताभावरहिता पृथिवी । करका-समवेतवाजिविषाणसमवेतजातिमती वा (१) । सा द्विविधा नित्यानित्यभेदात् । नित्यः परमाणुरनित्या कार्यरूपा । पृथिवीत्वं नित्यवृत्ति घटपटवृत्तिजातित्वात् सत्तावदिति तत्सिद्धिः । न च पक्षासिद्धिः । घटो गगनवृत्तित्वरहितपटवृत्तिजातिमान् घट-पटव्यतिरेकित्वरहितत्वात् पटवदिति पृथिवीत्वासिद्धिः । न च सत्ताऽसिद्धिः गगनं द्रव्यत्वेतरजातिमत् भूतत्वात् घटवदित्यनुमानात् सत्तासिद्धिः । न च द्रव्यत्वासिद्धिः । गगनादि रूपावृत्तिजातिमत् गुणवत्त्वात् घटवदिति द्रव्यत्वसिद्धिः । कार्यं त्रिविधं शरीरादिभेदेन । तत्र भोगायतनमन्त्यावयवि शरीरम् । शरीरसंयुक्तमपरोक्षप्रतीतिसाधनमतीन्द्रियमिन्द्रियम् । ज्ञानकरणजन्यत्वरहितज्ञानत्वमपरोक्षत्वम् । अतीन्द्रियत्वं नामाज्ञातसाधनत्वम् । प्रतीयमानतया भोगसाधनं विषयः । इति पृथिवीप्रकरणम् ॥

---

(१) करकायामसमवेता वाजिनि विषाणे च समवेता या जातिस्तद्वतीत्यर्थः ॥

पृथिवीवृत्तित्वरहितहिमकरकावृत्तिजातिमज्जलम्। तन्नित्यानित्यभेदाद् द्विविधम्। जलत्वं नित्यवृत्ति हिमकरकावृत्तिजातित्वात् सत्तावदिति तत्सिद्धिः। करका गगनवृत्तित्वरहितहिमवृत्तिजातिमती स्नेहाधिकरणत्वात् हिमवत् इति करकायां तत्सिद्धिः। अनित्यं त्रिविधं शरीरादिभेदेन। शरीरं वरुणलोके। जलपरमाणवः पारम्पर्येण शरीरारम्भकाः इन्द्रियारम्भकत्वात् पार्थिवपरमाणुवत्। इन्द्रियारम्भकत्वं तु रसनस्याप्यत्वात् सिद्धम्। रसनमाप्यं रूपादिषु पञ्चसु मध्ये रसस्यैवाभिव्यञ्जकत्वात्। सक्तुरसाभिव्यञ्जकसलिलवदिति। रसनसिद्धिस्तु रसोपलब्धिः करणसाध्या अपरोक्षप्रतीतित्वात् रूपोपलब्धिवदिति। विषयस्तु सरित्समुद्रादिर्हिमकरकादिः। न च करकायाः काठिन्यात् पार्थिवत्वमाशङ्कनीयम्। अनन्तरमेव स्वभावापगमादिति। इत्यापःप्रकरणम्॥

रसात्यन्ताभावसमानाधिकरणरूपाधिकरणं तेजः। करकावृत्तित्वरहितविद्युदाकरजवृत्तिजातिमद्वा। विद्युत्तेजः करकावृत्तित्वरहिताकरजवृत्तिजातिमती

वा विद्युद्व्यतिरिक्ताकरजान्यत्वरहितत्वात् आ-
करजवत्। आकरजं सुवर्णादि। ननु सुवर्णादिकं
पार्थिवं नैमित्तिकद्रवत्वाधिकरणत्वात् घृतवत्। अ-
नेन पार्थिवत्वसिद्धावाकरजवृत्तिजातिमत्त्वसाधने
ऽपि विद्युत्तेजसो न तैजसत्वसिद्धिरिति चेन्न। सुव-
र्णादिकमपार्थिवम् अत्यन्ताग्निसंयोगे ऽपि अनु-
च्छिद्यमानद्रवत्वाधिकरणत्वादितिप्रत्यनुमानेनापा-
र्थिवत्वसिद्धौ असांसिद्धिकद्रवत्वेन तत्सिद्धिः।
अन्यथा पार्थिवत्वे द्रवत्वमत्यन्ताग्निसंयोगे उ-
च्छिद्येतेति तर्कोऽनुसरणीयः। तच्च द्विविधम्। नि-
त्यमनित्यं चेति। तेजस्त्वं नित्यवृत्ति विद्युदाकरज-
वृत्तिजातित्वात् सत्तावदिति नित्यत्वसिद्धिः। सा-
धितं तेजस्त्वम्। अनित्यं त्रिविधम्। शरीरादिभे-
देन। शरीरमादित्यलोके तस्यापि पूर्ववत्सिद्धिः। इ-
न्द्रियं रूपोपलम्भकं चक्षुः। रूपोपलब्धिः करणसा-
ध्या क्रियात्वात् छिदिक्रियावदिति तत्सिद्धिः।
कर्तृप्रेर्यं करणम्। धातुवाच्या क्रिया। चक्षुः तैजसम्
रूपादिषु पञ्चसु मध्ये रूपस्यैवाभिव्यञ्जकत्वात्
आलोकवत्। विषयस्तु भौमादिः। इति तेजःप्र-
करणम् ॥

रूपात्यन्ताभावाधिकरणस्पर्शाधिकरणो वायुः । विप्रतिपन्नः स्पर्शः रूपरहितद्रव्यवृत्तिः स्पर्शत्वरहितशब्दान्यत्वरहितत्वात् शब्दवदिति वायुसिद्धिः । स च द्विविधः । नित्यानित्यभेदेन । वायुत्वं नित्यवृत्ति नित्यवृत्तित्वरहितवायुत्वान्यत्वरहितत्वात् पृथिवीत्ववदिति तत्सिद्धिः । कार्यं त्रिविधं शरीरादिभेदेन । वायुत्वं शरीरवृत्ति बाह्येन्द्रियवृत्तिजातित्वात् सत्तावदिति तत्सिद्धिः । स्पर्शोपलम्भकमिन्द्रियं वायवीयं रूपादिषु पञ्चसु मध्ये स्पर्शस्यैवाभिव्यञ्जकत्वात् । व्यजनपवनवदिति । विषयस्तु उपलभ्यमानस्पर्शाधिष्ठानभूतः प्राणस्तु शरीरादिप्रेरणहेतुर्वायुः । इति वायुप्रकरणम् ॥

शब्दात्यन्ताभावानधिकरणं नभः । संयोगजन्यजन्यविशेषगुणसमानाधिकरणविशेषाधिकरणं वा । शब्दः क्वचिदाश्रितः गुणत्वाद्रूपवत् । न च शब्दस्य स्पर्शवदाश्रयः स्पर्शासहकारित्वात् बुद्धिवदिति । न च कालाद्याश्रयः बाह्येन्द्रियग्राह्यत्वात् रूपवदिति परिशेषात्तत्सिद्धिः । इत्याकाशप्रकरणम् ॥

अनियतपरत्वासमवायिसमवायित्वरहितपरत्वासमवायिसमवायिमूर्तत्वरहितः कालः । गगनम् अनियतपरत्वासमवायिसमवायित्वरहितमूर्तत्वरहितज्ञानसमवायित्वरहितत्वद्रव्यान्यत् अमूर्तत्वादात्मवदिति तत्सिद्धिः । इति कालप्रकरणम् ॥

अनियतपरत्वासमवायिसमवायिनी मूर्तत्वरहिता दिक् । कालो विशेषगुणरहितो मूर्तद्रव्यान्यः मूर्तत्वरहितत्वात् आकाशादिवदिति तत्सिद्धिः । इति दिक्प्रकरणम् ॥

ज्ञानात्यन्ताभावरहित आत्मा । परत्वासमवायिसमवायित्वरहितशब्दासमानाधिकरणकार्याश्रयो वा । ज्ञानं क्वचिदाश्रितं गुणत्वाद्रूपवदिति तत्सिद्धिः । न च शरीरेन्द्रियाणां तदाश्रयत्वं कार्यत्वात घटवदिति । कार्यस्य तदाश्रयत्वे स्वर्गाद्यर्थितया ज्योतिष्टोमाद्युपदेशो न स्यात् । न च मनसस्तदाश्रयत्वं करणत्वाच्चक्षुर्वत् । स द्विविधः ईश्वरानीश्वरभेदात् । अङ्कुरादिकं सकर्तृकं कार्यत्वाद् घटवदिति ईश्वरसिद्धिः । द्वितीयस्त्वहंप्रत्ययवेद्यः स च नाना व्यवस्थावचनादिति । इत्यात्मप्रकरणम् ॥

स्पर्शरहितत्वे सति मूर्तं मनः। विशेषगुणात्यन्ताभावाधिकरणत्वे सति मूर्तं वा। पृथिवीवृत्तिपृथिवीत्वरहितवृत्तिवृत्तित्वरहितगुणत्वव्याप्यजातिमान् विशेषगुणः। आत्मप्रतीतिः करणसाध्या अपरोक्षप्रतीतित्वात् रूपोपलब्धिवदिति तत्सिद्धिः। इति मनःप्रकरणम्। इति द्रव्यपदार्थः॥

संयोगाजन्यसंयोगासमवायिसमवेतत्वरहितसंयोगासंयोगसमवेतवान् गुणः। विभागाजन्यविभागासमवायिसमवेतत्वरहितविभागाविभागसमवेतवान् गुणः। रूपं संयोगाजन्यसंयोगासमवायिसमवेतत्वरहितसंयोगसमवेतत्वरहितसंयोगसमवेतवत् रूपत्वरहितसंयोगान्यत्वरहितत्वात् संयोगवदिति गुणत्वसिद्धिः। चतुर्विंशतिप्रकारो रूपादिभेदेन। रसासमवेतनीलपीतसमवेतवद्रूपम्। गुणत्वे सति चक्षुर्मात्रग्राह्यं वा। तत्सप्तप्रकारम्। न च रूपग्राहकं चक्षुश्चक्षुर्मात्रग्राह्यं रूपमित्यन्योन्याश्रयत्वम्। नयनगोलकाधिष्ठानत्वेन चक्षुर्निरूपणात्। शुक्लो रसासमवेतनीलसमवेतवान् शुक्लत्वरहितनीलान्यत्वरहितत्वात् नीलवदिति रूपत्वसिद्धिः। नीलं स्वमात्र-

समवेतवत् स्वमात्रसमवेतत्वरहितनीलान्यत्वरहितत्वात् घटवदिति नीलत्वजातिसिद्धिः। नीलत्वरहितघटत्वात्यन्ताभावत्वरहितः स्वशब्दार्थः। गुणत्वे सति रसनग्राह्यो रसः। स च षोढा माधुर्यादिभेदेन। क्षीरेक्षुगुडसलिलेषु माधुर्यादिसाम्येऽपि अवान्तरजातिभेदस्य विद्यमानत्वात् विशेषगुणत्वसिद्धिः। गुणत्वे सति घ्राणग्राह्यो गन्धः। जलादावौपाधिकी गन्धप्रतीतिर्न स्वभावत इति विशेषगुणत्वसिद्धिः। जलं न गन्धाधिकरणं पाकजरूपानधिकरणत्वात्तेजोवत्। वायोः पक्षतुल्यत्वान्न व्यभिचारः। गुणत्वे सति त्वगिन्द्रियग्राह्यः स्पर्शः। स त्रिविधः। शीतोष्णानुष्णाशीतभेदात्। नन्वनुष्णाशीतस्पर्शस्य कथं विशेषगुणत्वं तस्य पृथिवीवायुसाधारणत्वात् पाकजत्वापाकजत्वाभ्यामवान्तरजातिभेदेन विशेषगुणत्वे नैमित्तिकद्रवत्वस्याप्यत्यन्ताग्निसंयोगे सत्युच्छेदानुच्छेदाभ्यामवान्तरजातिसद्भावेन विशेषगुणता स्यात्। ततश्च नैमित्तिकद्रवत्वस्य सामान्यगुणपाठो निरर्थकः स्यात्। अनुष्णाशीतस्पर्शस्य वा पाठः स्यात्। ततश्च वायो-

बाह्येन्द्रियग्राह्यविशेषगुणपाठो निरर्थकः स्यात् । सेयमुभयतः पाशारज्जुः । मैवम् । अवान्तरजातिभेदस्य क्षीरेक्षुगुडमाधुर्यादिवदनुभवासिद्धत्वात् । अन्यथा महान्धकारे स्पर्शोपलम्भमात्रेण वायुर्वातीति प्रत्ययो न स्यात् । न चैवं सति नैमित्तिकद्रवत्वस्यावान्तरजातिभेदानुभवः । वायुस्पर्शः पृथिवीवृत्तित्वरहितगुणत्वव्याप्यजातिमान् अपाकजस्पर्शत्वात् तेजःस्पर्शवदित्यनुमानात् । पृथक्त्वासमवेतसर्वान्योन्याभावसमानाधिकरणैकद्रव्यसमवेतवती संख्या । आदाविन्द्रियसन्निकर्षघटनादेकत्वसामान्यधीरेकत्वोभयगोचरा मतिरतो द्वित्वं ततो जायते द्वित्वत्वप्रमितिः स्वतोपि परतो द्वित्वप्रमानन्तरं द्वे द्रव्ये इतिधीरियं निगदिता द्वित्वोदयप्रक्रिया । संख्यासमवेतत्वरहितसंख्यासमवायिसमवेतवत् परिमाणम् । शब्दासमवायिकारणसमवेतत्वरहितसर्वान्योन्याभावसमानाधिकरणसमवेतपरिमाणासमवायिसमवेतत्वरहिताधिकरणं पृथक्त्वम् । विभागासमवेतत्वाभावाविरोधिसमवेतप्रध्वंसप्रतियोगित्वानधिकरणसमवेतत्वानधिकरणगुणत्वसाक्षाद्

व्याप्यजात्यधिकरणं संयोगः १। विभागासमवेतसर्वान्योन्याभावसमानाधिकरणसमवेतशब्दासमवायिसमवेतवान् वा संयोगः । संयोगासमवेतसर्वान्योन्याभावसमानाधिकरणसमवेतशब्दासमवायिसमवेतवान् विभागः । विशेषणतया परप्रत्ययनिमित्तं परत्वम् । विशेषणतया अपरप्रत्ययनिमित्तमपरत्वम् । अर्थप्रकाशो बुद्धिः । यस्मिन् सत्यनुरागस्तत् सुखम् । यस्मिन् सत्यनुद्वेषस्तद्दुःखम् । प्रार्थना इच्छा । ज्वलनात्मको द्वेषः । प्रयत्न उत्साहः । आद्यपतनासमवायिकारणं गुरुत्वम् । आद्यस्यन्दनासमवायिकारणं द्रवत्वम् । पृथिवीवृत्त्यवृत्तिरससमानाधिकरणवृत्तिशब्दावृत्तिगुणत्वसाक्षाद्व्याप्यजातिमान् स्नेहः । द्रवत्वनिष्ठत्वरहितात्मविशेषगुणनिष्ठत्वरहितपरत्वापरत्वात्यन्ताभावप्रतियोगिसत्तावान्तरजातिमदसमवायिकारणं स्नेहः । द्रवत्वरहितध्वंसान्यत्वविशेषगुणमात्रजनकरहितात्यन्ताविशेषगुणरहितभावत्वं समवायिकारणं १ स्नेहः । संग्रहादिहेतुः । गगनसमवेतसमवेतत्वरहितमूर्तामूर्तसमवेतसमवेतवान् संस्कारः । विहितक्रियया साध्यः पुंगुणो धर्मः । निषिद्धक्रि-

यया साध्यः पुंगुणोऽधर्मः । गुणत्वे सति श्रोत्रग्राह्यः शब्दः । इति गुणपदार्थः ॥

संयोगासमवेतसंयोगासमवायिसमवेतवत् कर्म । तच्च पञ्चविधम् । उत्क्षेपणादिभेदेन । तत्राधोदेशविभागोर्ध्वदेशसंयोगजनकं कर्म उत्क्षेपणम् । ऊर्ध्वदेशविभागाधोदेशसंयोगजनकं कर्मापक्षेपणम् । अग्रदेशविभागमूलदेशसंयोगजनकं कर्माकुञ्चनम् । मूलदेशविभागाग्रदेशसंयोगजनकं कर्म प्रसारणम् । उत्क्षेपणाकुञ्चनं च प्रयत्नजनिष्ठं न च गमनस्यापि प्रसङ्गादप्रयत्नजं कर्म गमनम् । ननु पञ्चैव कर्माणीति नोपपद्यते भ्रमणादीनां सत्त्वादिति चेन्न । भ्रमणादयोपि कर्मविशेषा इत्युक्तं शास्त्रकृद्भिः ॥

समवेतत्वरहितसर्वान्योन्याभावसमानाधिकरणसमवेतं सामान्यम् ॥

समवेतत्वरहितसर्वान्योन्याभावसमानाधिकरणरहिताः समवेतरहितसमवेता विशेषाः ॥

नित्यः सम्बन्धः समवायः । समवेतत्वरहितसर्वान्योन्याभावसमानाधिकरणाभावो वा ॥

नञर्थविषयप्रत्ययविशेषोऽभावः । स च चतुर्धा भिद्यते। प्रागभावः प्रध्वंसाभावोऽत्यन्ताभावोऽन्योन्याभावश्चेति ।उत्तरैकावधिरभावः प्रागभावः। पूर्वैकावधिरभावः प्रध्वंसाभावः । तादात्म्यप्रतियोगिकोऽभावोऽन्योन्याभावः । उभयावधिरहितसंसर्गाभावोऽत्यन्ताभावः ॥

तर्काम्बराङ्कप्रमितेष्वतीतेषु शकान्ततः ।
वर्षेषूदयनश्चक्रे सुबोधां लक्षणावलीम् ॥
विद्यासन्ध्योदयोद्रेकादविद्यारजनीक्षये ।
यदुदेति नमस्तस्मै कस्मैचिद्विश्वतस्त्विषे॥

इति श्रीमदुदयनाचार्यविरचिता लक्षणावली

समाप्ता ।

—०*०—

बनारस संस्कृतसीरीज़
अर्थात्

# वाराणसीसंस्कृतपुस्तकावली ।

## तत्र मुद्रिता ग्रन्थाः ।

| | रु० | आ० |
|---|---|---|
| सिद्धान्ततत्त्वविवेकः खण्डानि ५ | ५ | ० |
| अर्थसङ्ग्रहः अंग्रेजीभाषानुवादसहितः | १ | ० |
| तन्त्रवार्त्तिकम् खण्ड १० | १० | ० |
| कात्यायनमहर्षिप्रणीतं शुक्लयजुःप्रातिशाख्यं सभाष्यं खण्ड ६ | ६ | ० |
| सांख्यकारिका चन्द्रिकाटीकागौडपादभाष्यसहिता | १ | ० |
| वाक्यपदीयं खण्ड ३ | ३ | ० |
| रसगङ्गाधरः खण्ड ८ | ८ | ० |
| परिभाषावृत्तिः खण्ड २ | २ | ० |
| वैशेषिकदर्शनं किरणावलीटीकासंवलितप्रशस्तपादप्रणीतभाष्यसहितम् खण्ड २ | २ | ० |
| शिक्षासङ्ग्रहः खण्ड ५ | ५ | ० |
| नैष्कर्म्यसिद्धिः खण्ड ३ | ३ | ० |
| महर्षिकात्यायनप्रणीतं शुक्लयजुस्सर्वानुक्रमसूत्रम् सभाष्यं खण्ड ३ | ३ | ० |
| ऋग्वेदीयशौनकप्रातिशाख्यं सभाष्यम् | १ | ० |
| न्यायलीलावती ( यन्त्रस्था ) | ० | ० |

इनसे अधिक अनेक प्रकारकी संस्कृत हिन्दी और अंग्रेजी आदि पुस्तकें हमारे यहां मिलती हैं जिनको अपेक्षित हो नीचे लिखेहुए पतेपर पत्र भेजें ॥

**ब्रजभूषणदास और कम्पनी**

चांदनीचौक के उत्तर नई सड़क बनारस ।

PLEASE DO NOT REMOVE
CARDS OR SLIPS FROM THIS POCKET

UNIVERSITY OF TORONTO LIBRARY

B 132 V2U3 1897
Udayanacarya
Laksanavali

UTL AT DOWNSVIEW
D RANGE BAY SHLF POS ITEM C
39 13 07 23 14 004 2